**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**श्रीरघुनाथकीर्तिपरिसरः,**

**वेद-पौरोहित्य-कर्मकाण्ड-विद्याशाखा, देवप्रयागः,उत्तराखण्डः**

द्विदिवसीय-राष्ट्रीय-वेद- संगोष्ठी

मुख्य विषयः-षोडश संस्काराणां महत्त्वं

प्रासङ्गिकता च ।

# प्रतिवेदनम्

**वेद-पौरोहित्य-कर्मकाण्ड-विद्याशाखा** द्वारा समायोजिते कार्यक्रमे षोडश संस्काराणां महत्त्वं प्रासङ्गिकता च इत्यमुं विषयमधिकृत्य 24 दिनांके अन्तर्जालीयमाध्यमेन प्रत्यक्षतया च उद्घाटनसत्रे मुख्यातिथिरूपेण गुरूजी डॉ मनोज जुयाल महोदयाः आसन्। अध्यक्षाः प्रो. पी. वी. बी. सुब्रह्मण्यम महोदयाः, मुख्यवक्ता डॉ ओम प्रकाश पाण्डेय महोदयाः, विशिष्टातिथिः प्रो. मनोज कुमार मिश्र महोदयाः एतैः सर्वैः महानुभावैः स्वस्वोद्बोधनेन स्वाशीर्वचोभिश्च अस्मान् उपकृतवन्तः। एवमेव अन्तर्जालीयमाध्यमेन प्रत्यक्षतया च

द्विचत्वारिंशत् शोधपत्रवाचकाः स्वीयगाम्भीर्येण शोधेन शोधपत्राणि षट्तकनीकिसत्रेषु प्रास्तुवन्। अथ च सम्पूर्तिसत्रे मुख्यातिथित्वेन प्रो. बनमाली विस्वाल महोदयाः स्वकीयवैदुष्यपूर्णेन व्याख्यानेन स्वीयाशीर्वचोभिश्च अस्मान् उपकृतवन्तः। विशिष्टातिथिरूपेण राजज्योतिर्विद पं विनोद विजल्वाण महोदयाः सारस्वतातिथिः प्रो. राजेश्वर प्रसाद मिश्र महोदयाः सम्मानितातिथिः आचार्य भुवनचन्द्र उनियाल महोदयाः बद्रीनाथधाम पूर्वधर्माधिकारिणःएभिः महानुभावैः स्वीयाशीर्वचोभिः वैदुष्यपूर्णैः व्याख्यानैः परिसरं समुपकृतवन्तः। अध्यक्षीयोद्बोधनेन प्रो. पी. वी. बी. सुब्रह्मण्यम महोदयाः परिसरीयच्छात्रान् प्राध्यापकांश्च सनाथीकृतवन्तः। उद्घाटनसत्रे सम्पूर्तिसत्रे च कार्यक्रमसंयोजकाः डॉ. शैलेन्द्र प्रसाद उनियाल महोदयाः संचालनपूर्वकं विषयप्रस्तावनां तथा च प्रतिवेदनं प्रास्तुवन्। समस्त सत्राणां संचालनं श्री अंकुरवत्सेन डॉ. अमन्दमिश्रेण शोधपत्रवाचनं च विहितम्। धन्यवादज्ञापनं डॉ शैलेन्द्र नारायण कोटियाल महोदयैः विहितम्।